Chapter Name:दीनवत्सला जननी। *Marks :(1)*

Quest:

**कोष्ठकात् समुचितमुत्तरं निर्धार्य लिखत।**

1. सर्वधेनूनां माता का? (सुरसा, लक्ष्मी, सुरभिः, अपर्णा)

2. दीनवत्सला जननी इति पाठः महाभारते कस्मिन् पर्वणि अन्तर्भवति?

(वनपर्वणि, भीष्मपर्वणि, सभापर्वणि, उद्योगपर्वणि)

3. कृषकेन ताडितं वृषभं दृष्ट्वा का रुरोद?

(अपर्णा, सुरसा, माता, सुरभिः)

4. कृषकः दुर्बलं वृषभं केन ताडयन् अवर्तत?

(तोदनेन, दण्डेन, पाशेन, बाणेन)

5. अयि शुभे किमेवं रोदिषि ? कस्य वचनमिदम्?

(असुराधिपस्य, सुराधिपस्य, नराधिपस्य, देशाधिपस्य)

6. दीनवत्सला जननी इति पाठः कस्मिन् ग्रन्थे अन्तर्भवति?

(भागवते, रामायणे, महाभारते, कर्णभारे)

7. खिन्ना सुरभिः केन समाश्वासिता?

(वायुना, व्यासेन, वासवेन, धेनुना)

8. वृषभः इत्यस्य समानार्थकं पदं किम्?

(गजः, अश्वः, बलीवर्दः, गर्दभः)

9. दुर्योधनकृतं पाण्डवद्रोहं पश्यन् व्यासः कम् उपेतवान्?

( पाण्डुम्, इन्द्रम्, द्रोणम्, धृतराष्ट्रम्)

10. दीनवत्सला जननी इति कथायाः प्रतिपाद्यः कः?

(स्वार्थता, निर्ममता, दीनानुकम्पा, कपटता)

11. अधोलिखितेषु शत्रन्तरूपं किम्?

(अलिखन्, आविरासन्, ताडयन्, अवसन्)

12. किं गणे नान्तर्भवति? (रुदन्, लिखन्, वदन्, पचमानः)

Hint:

**कोष्ठकात् समुचितमुत्तरं निर्धार्य लिखत।**

1. सुरभिः।
2. वनपर्वणि।
3. सुरभिः।
4. तोदनेन।
5. सुराधिपस्य।
6. महाभारते।
7. वासवेन।
8. बलीवर्दः।
9. धृतराष्ट्रम्।
10. दीनानुकम्पा।
11. ताडयन्।

12. पचमानः।

Chapter Name:**दीनवत्सला जननी।** *Marks :(4)*

Quest:

**यथोचितं योजयत।**

**क)** महाभारतम् - शानच् प्रत्ययान्त:।

बलीवर्द: - धेनूनां माता।

सुरभि: - वृषभ:।

नुद्यमान: - वनपर्व:।

**ख)** वोढुम् - लिट्

ताडयन् - सम्भोधना

कृषक! - शत्रन्तम्

पपात - तुमुन्नन्तमव्ययम्

Hint:

**यथोचितं योजयत।**

**क** महाभारतम् - वनपर्व:

बलीवर्द: - वृषभ:

सुरभि: - धेनूनां माता।

नुद्यमान: - शानच् प्रत्यायान्त:

**ख)** वोढुम् - तुमुन्नन्तमव्ययम्

ताडयन् - शत्रन्तम्

कृषक! - सम्भोधना

पपात - लिट्

Chapter Name:**दीनवत्सला जननी।** *Marks :(3)*

Quest:

**अधोरेखाङ्कितं पदम् उत्तरत्वेन लब्धुम् उचितान् प्रश्नान् लिखत।**

**उदाः - कृषकः गन्तुमशक्तां धेनुं <u>तोदनेन</u> ताडयति ।**

कृषकः गन्तुमशक्तां धेनुं **केन** ताडयति **?**

क) स्वपुत्रस्य दैन्यं दृष्ट्वा **<u>सुरभिः</u>** रुदति ।

ख) कृषकः **<u>क्षेत्रकर्षणं</u>** कुर्वन् आसीत् ।

ग) वृषभः **<u>क्षेत्रे</u>** पपात ।

Hint:

**अधोरेखाङ्कितं पदम् उत्तरत्वेन लब्धुम् उचितान् प्रश्नान् लिखत।**

**क) का?**

**ख)किम्?**

**ग) कुत्र?**

Chapter Name:दीनवत्सला जननी।   *Marks :(3)*

Quest:

**अधोदत्तं सम्भाषणांशं पठित्वा वाक्यमिदं कः कं प्रति वदति इति लिखत ।**

१) अयि शुभे! किमेवं रोदिषि ?

२) सर्वेष्वपत्येषु जननी तुल्यवत्सला एव ।

३) गच्छ वत्से! सर्वं भद्रं जायेत ।

४) पुत्रः दीन इति जानन्नपि तं ताडयति ।

Hint:

**अधोदत्तं सम्भाषणांशं पठित्वा वाक्यमिदं कः कं प्रति वदति इति लिखत ।**

**१. इन्द्रः सुरभिम्।**

**२. सुरभिः इन्द्रम्।**

**३. इन्द्रः सुरभिम्।**

**४. सुरभिः इन्द्रम्।**

Chapter Name:दीनवत्सला जननी।   *Marks :(4)*

Quest:**अधोलिखितानि सम्भाषणांशानि कस्य इति विविच्य पट्टिकारुपेण लिखत ।**

क) अयि शुभे ! किमेवं रोदिषि ?

ख) सर्वेष्वपि अपत्येषु जननी तुल्यवत्सला एव ।

ग) गच्छ वत्से ! सर्वं भद्रं जायेत ।

घ) पुत्रः दीनः इति जानन्नपि तं बहुधा ताडयति ।

सुरभिः इन्द्रः

Hint:

**अधोलिखितानि सम्भाषणांशानि कस्य इति विविच्य पट्टिकारुपेण लिखत ।**

| **सुरभिः।** | **इन्द्रः।** |
|---|---|
| ख) सर्वेष्वपि अपत्येषु जननी तुल्यवत्सला एव । | क) अयि शुभे ! किमेवं रोदिषि ? |
| घ) पुत्रः दीन इति जानन्नपि तं बहुधा ताडयति | ग) गच्छ वत्से ! सर्वं भद्रं जायेत । |

Chapter Name:**दीनवत्सला जननी।** *Marks :(4)*

Quest:

**अधोलिखितानि सम्भाषणांशानि कस्य इति विविच्य पट्टिकारुपेण लिखत ।**

**ख)** ङ) बहून्यपत्यानि मे सन्तीति सत्यम् ।

च) गच्छ वत्से ! सर्वं भद्रं जायेत ।

छ) पुत्रस्य दैन्यं दृष्ट्वा अहं रोदिमि ।

ज) अस्मिन्नेव एतादृशं वात्सल्यं कथम्?

सुरभिः इन्द्रः

**Hint:अधोलिखितानि सम्भाषणांशानि कस्य इति विविच्य पट्टिकारुपेण लिखत ।**

| **ख)** इन्द्रः | सुरभिः |
|---|---|
| च) गच्छ वत्से ! सर्वं भद्रं जायेत । | ङ) बहून्यपत्यानि मे सन्तीति सत्यम् । |
| ज) अस्मिन्नेव एतादृशं वात्सल्यं कथम्? | छ) पुत्रस्य दैन्यं दृष्ट्वा अहं रोदिमि । |

**Chapter Name:दीनवत्सला जननी।** *Marks :(2)*

**Quest:**

**समानार्थकपदानि चित्वा लिखत ।**

( ऋषभः , कृषकः , वासवः , इन्द्रः , कृषीवलः , बलीवर्दः )

उदा - कृषीवलः कृषकः

**Hint:**

6 समानार्थकपदानि चित्वा लिखत ।

कृषीवलः - कृषकः

ऋषभः - बलीवर्दः

वासवः - इन्द्रः

Chapter Name:दीनवत्सला जननी। *Marks :(2)*

Quest:

उचितपदयोजनेन पूरयत ।

1. ---------- सह प्रवर्षः समजायत । (चण्डवातेन / चण्डवातस्य )

2. पुत्रस्य दैन्यं ----------- अहं रोदिमि ।( द्रष्टुम् / दृष्ट्वा )

Hint:

उचितपदयोजनेन पूरयत ।

1. चण्डवातेन।

2. दृष्ट्वा।

Chapter Name:दीनवत्सला जननी। *Marks :(4)*

Quest:

शतृशानजन्तरूपाणि विविच्य पट्टिकां लिखत।

(नुद्यमानः, गच्छन्, पठन्, गम्यमानः, जल्पमानः, प्रेरयन्, कम्पमानः, रुदन्, वन्दमानः, पचमानः, पचन्, ताडयन्)

| | |
|---|---|
| शत्रन्तरूपाणि | शानचन्तरूपाणि |

Hint:

**शतृशानजन्तरूपाणि विविच्य पट्टिकां लिखत।**

| **शत्रन्तरूपाणि** | **शानजन्तरूपाणि** |
|---|---|
| गच्छन् | नुद्यमानः |
| पठन् | गम्यमानः |
| प्रेरयन् | जल्पमानः |
| रुदन् | पचमानः |
| पचन् | वन्दमानः |
| ताडयन् | कम्पमानः |

Chapter Name:दीनवत्सला जननी। *Marks :(1)*

Quest:

**उदाहरणानुसारं पदच्छेदं लिखत।**

**क)** कुर्वन्नासीत् - कुर्वन् + आसीत्।

गच्छन्नासीत् - ----- +------।

वदन्नपि - ----- +------।

तस्मिन्नेव - ---- +------।

**ख)** नोत्थितः - न + उत्थितः।

नोचितः - ------ +-------।

नोदितः - ----- + ------।

**ग)** दुःखिताभूत् - दुःखिता+ अभूत्।

तथापि - ------+ -------।

तापितापि - -----+ --------।

**उदाहरणानुसारं सन्धिरूपं लिखत।**

**क)** तयोः + एकः। - तयोरेकः।

बालयोः + अपि - -----------।

देवयोः+ अपि - - -----------।

**ख)** सर्वेषु + अपत्येषु - सर्वेष्वपत्येषु।

खलु + अयम् - -----------।

तेषु + अन्यतमः - -----------।

खलु + आर्यपुत्रः - -----------।

**Hint:**

**उदाहरणानुसारं पदच्छेदं लिखत।**

**क)** गच्छन् + आसीत्।

वदन् + अपि ।

तस्मिन् + एव

**ख)** न + उचितः ।

न + उदितः ।

**ग)** तथा +अपि ।

तापिता + अपि ।

**उदाहरणानुसारं सन्धिरूपं लिखत।**

**क)** बालयोरपि ।

देवयोरपि ।

**ख)** खल्वयम् ।

तेष्वन्यतमः ।

खल्वार्यपुत्रः ।

**Chapter Name:दीनवत्सला जननी।** *Marks :(1)*

**Quest:**

**उदाहरणानुसारं विग्रहं लिखति।**

सुराधिपः - सुराणाम् अधिपः।

देवाधिपः - -------------।

धनाधिपः - -------------।

नराधिपः - -------------।

**Hint:**

**उदाहरणानुसारं विग्रहं लिखति।**

देवाधिपः - देवानाम् अधिपः।

धनाधिपः - धनानाम् अधिपः।

नराधिपः - नराणाम् अधिपः।

**Chapter Name:दीनवत्सला जननी।** *Marks :(4)*

**Quest:**

**क) मञ्जुषातः पदानि स्वीकृत्य अधोदत्तान् सम्भाषणाम्शान् पूरयत ।**

(ताडयति , वासव , अधिकवात्सल्यम् , किमर्थं , )

देवेन्द्र: - वत्से ! ---------------- विलपति?

सुरभिः - भो .......... ! मम पुत्रस्य दैन्यतां दृष्ट्वा विलपामि ।

देवेन्द्र: - पुत्रस्य किमभवत् ?

सुरभि - मम दुर्बलं पुत्रं कृषक: ----------।

देवेन्द्र: - सहस्राधिकपुत्रवती भवति किमर्थं अस्मिन् पुत्रे ............ प्रकटयति ?

सुरभिः - दुर्बले सुते अधिकवात्सल्यं मातृ सहजा एव।

देवेन्द्र: - चिन्ता मास्तु | सर्वं शुभं जायेत |

**ख) सन्दर्भमिमं पठित्वा सुरभेः इन्द्रस्य च भाषणं सम्भाव्य लिखत।**

कृषकेण ताडितं स्वपुत्रं दृष्ट्वा सर्वधेनूनां मातुः सुरभेः नेत्राभ्याम् अश्रूणि प्रवहन्ति स्म। सुरभेः इमाम् अवस्थां दृष्ट्वा सुराधिपः देवेन्द्रः कारणम् अपृच्छत्। तस्याः पुत्रः दीन इति जानन्नपि कृषकः तं ताडयति इति सा अकथयत्। "गच्छ वत्से!, सर्वं भद्रं जायेत इति इन्द्रः तां स्माश्वासितवान्।

इन्द्रः - -----------------------।

सुरभिः - -----------------------।

इन्द्रः - -----------------------।

सुरभिः - -----------------------।

Hint:

**क) मञ्जुषातः पदानि स्वीकृत्य अधोदत्तान् सम्भाषणाम्शान् पूरयत ।**

किमर्थं।

देवेन्द्रः।

ताडयति।

अधिकवात्सल्यम् ।

**ख) उचितस्य सम्भाषणांशस्य एकैकोऽङ्कः**

**Chapter Name:दीनवत्सला जननी।** *Marks :(4)*

**Quest:**

**सूचनानुसारम् कथां विपुलीकुरुत।**

सूचना: - कृषक: - क्षेत्रकर्षणम् - दुर्बल: वृषभ: - तोदनेन ताडनम् - सुरभे: विलाप: - दीनवत्सला जननी - देवेन्द्रकृता वृष्टि: - कृषक: कर्मविमुख:- वृषभस्य मुक्तिः।

Hint:

**सूचनानुसारम् कथां विपुलीकुरुत।**

कथास्वरूपस्य १

सर्वाः सूचनाः स्वीकृताः चेत् १

पूर्वापरक्रमस्य १

भाषाशुद्ध्यै १

Chapter Name:**दीनवत्सला जननी।** *Marks :(2)*

Quest:

**मातृकानुसारं परिवर्त्य लिखत ।**

**क) कृषकः धेनुं ताडयति। कृषकः धेनुम् अताडयत्।**

१ सुराधिपः सुरभिं पृच्छति। ------------ ।

२ सुरभिः देवेन्द्रं वदति। ------------ ।

**ख)** उदा- मातुः बहवः पुत्राः सन्ति । दीने पुत्रे कृपार्द्रहृदया अस्ति।

**यद्यपि** मातुः बहवः पुत्राः सन्ति **तथापि** दीने पुत्रे कृपार्द्रहृदया अस्ति।

१ अहं पाठं सुष्ठु अपठम्। पूर्णमङ्कं न सम्प्राप्तवान्।

२ नारिकेलवृक्षे अनेकानि फलानि सन्ति। कानिचित् उपयोगशून्यानि आसन्।

**Hint:**

**मातृकानुसारं परिवर्त्य लिखत ।**

**क)**

१ सुराधिपः सुरभिम् अपृच्छत्।

२ सुरभिः देवेन्द्रम् अवदत् ।

**ख)**

१ **यद्यपि** अहं पाठं सुष्ठु अपठम् **तथापि** पूर्णमङ्कं न सम्प्राप्तवान्।

२ **यद्यपि** नारिकेलवृक्षे अनेकानि फलानि सन्ति **तथापि** कानिचित् उपयोगशून्यानि आसन्।

**Chapter Name:दीनवत्सला जननी।** *Marks :(4)*

**Quest:**

**खण्डिकाम् पठित्वा प्रश्नानां उत्तराणि लिखत।**

व्यासेन विरचितम् इतिहासकाव्यम् भवति महाभारतम् | महाभारतमधिकृत्य व्यासोच्छिष्टं जगत्सर्वं इति उक्तिः प्रसिद्ध एव । प्रपञ्चेऽस्मिन् मातृस्नेह: अतिमहनीय: भवति | महाभारतस्य वनपर्वणि धृतराष्ट्रं प्रति व्यासोक्ता मातृवात्सल्यप्रतिपादिका एका कथा अस्ति | सा कथा दीनेषु अनुकम्पां प्रतिपादयति |

1 महाभारतस्य कर्ता क:?

2 प्रसिद्धः एव- इत्यस्य सन्धिरूपं लिखत।

3 महाभारतमधिकृत्य विद्यमाना प्रसिद्धा उक्ति: का ?

4 "दया" इत्यस्य समानार्थक पदं खण्डिकाया: चित्वा लिखत ।

**Hint:**

**खण्डिकाम् पठित्वा प्रश्नानां उत्तराणि लिखत।**

१ व्यासः।

२ प्रसिद्ध एव ।

३ महाभारतमधिकृत्य व्यासोच्छिष्टं जगत्सर्वं इति उक्ति: प्रसिद्ध एव ।

४ अनुकम्पाम्।